# Shri Brahmananda Stotram

# શ્રીબ્રહ્માનન્દસ્તોત્રમ્

## Document Information

Text title : Shri Brahmananda Stotram

File name : brahmAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Brahmachari Medhachaitanya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીબ્રહ્માનન્દસ્તોત્રમ્

બ્રજેન્દ્રનન્દાઙ્ગનભાસકારિણઃ સખેતિ વિત્તં પ્રભુપાદભાવિતૈઃ ।
વ્રજસ્ય રાખાલમનન્તસૌભગં, નમામિ શાન્તં શિશુભાવ સુન્દરમ્ ॥ ૧॥

મુહુર્મુહુઃ શ્રીહરિનામવિહ્વલં સુનિર્મલં યોગસુધાબ્ધિ મજ્જનાત્ ।
દયાઘનં નાથમનાથપાવનં નમામિ દાન્તં યતિવૃન્દશેખરમ્ ॥ ૨॥

ન રામકૃષ્ણસ્ય શરીરસમ્ભવઃ સ માનસાજ્જાત ઇતીહ કીર્તિતઃ ।
યથૈવ તાતઃ સુરસઙ્ઘપૂજિતસ્તથૈવ પુત્રો નરપાલ સેવિતઃ ॥ ૩॥

અનન્તભાવાલયદિવ્યસાગરં બહિઃ સુશાન્તાપિહિતાત્મભાવમ્ ।
ગતાખિલાધ્યાત્મ્ય સુરાજ્યસમ્પદં ભજામિ દેવાદ્ય મનોજનન્દનમ્ ॥ ૪॥

પ્રફુલ્લપઙ્કેરુહમધ્યચારિણા બલાનુજેનાઙ્ગ સમૂહગામિના ।
કરૈર્ધૃત નૃત્યસુગીતરમ્યકં નમો મહારાજમતીન્દ્રિયપ્રિયમ્ ॥ ૫॥

ન સાધનેનેહ ગતોઽસિ ભાવિનીં વદન્તિ સિદ્ધિં ત્વમસૌ ગદાધરાઃ ।
ય તો ભવાદૃક્ કૃતનિત્યસિદ્ધિગો વશી ક્ષમા મઙ્ગલકૃત્યવિગ્રહઃ ॥ ૬॥

મનુષ્યદેહં ભજતાપિ દૈવતાદ્ વરીયસા શુદ્ધ વિરાગિણા ત્વયા ।
પ્રભોર્નિયોગેન સલીલમાતનિ ક્રિયાતપોજ્ઞાનસમાધિસાધનમ્ ॥ ૭॥

ગૃહાણ દેવ ! પ્રણયેન સઞ્ચિતાન્યોગ્યભાજામપિ જીવનાનિ નઃ ।
અથાપિ ધેયાનિ મનાંસિ પાદયોસ્તવાતિશુદ્ધત્રિદિવેનવન્દ્યયોઃ ॥ ૮॥

યોઽધ્યાત્મ્યસામ્રાજ્યબલેન લોકાન્ સમ્ભૂય સર્વાન્ ભગવદ્ધિભાવૈઃ ।
આનન્દયત્ કામમજસ્રમિષ્ટાં સ્તં દેશિકેન્દ્રં પ્રણમામિ ભક્ત્યા ॥ ૯॥

વૈરાગ્યજ્યોતિરિદ્ધં ગુરુગતહૃદયં લોકચારિપ્રવિજ્ઞં
સઙ્ઘાધ્યક્ષં વિશાલં ક્ષિતિપતિસદૃશં દિવ્યદૃષ્ટિં કૃશાનુમ્ ।
રામશ્રીનામકીર્તિપ્રચરણમનસા દક્ષિણસ્યાં દિશન્તત્,
પ્રાચ્યાં ભૂમૌ નમામઃ સતતહિતપરં નીતિવન્તં યમીન્દ્રમ્ ॥ ૧૦॥

લોકે ખ્યાતિન્ત્વતુલ્યાં બહુમિતવિભવં રૂપશીલાદિયુક્તાં
પાતિવ્રત્યેસ્થિતાં સ્ત્રીં સજનકજનનીં સ્વાસ્થ્યતારુણ્યમામ્રમ્ ।
સન્ત્યજ્યસ્વામશેષામહિવિષયસદૃશીં તૂર્ણમાયન્ વિવેકં
વૈરાગ્યેણૈકમીશં શરણમવગતો રામકૃષ્ણં ગુરું ત્વમ્ ॥ ૧૧॥

બ્રહ્માનન્દ્રં વરેણ્યં યતિવરમનિશં ભાવસિન્ધૌ નિમગ્નં
સંસારાર્ત્તાન્ મનુષ્યાન્ સહજકરુણયા ચેતયન્તં મહાન્તમ્ ।
શુદ્ધં શાન્તં પ્રકાશં વિદિતચિતિસુખં રામકૃષ્ણાન્તરઙ્ગં
ધ્યાયેદ્ દિવ્યાકૃતિં ભોઃ કલિકલુષહરં ચિદ્ઘનં મૂર્તિમન્તમ્ ॥ ૧૨॥

ઇતિ બ્રહ્મચારિમેધાચૈતન્યવિરચિતં “શ્રીબ્રહ્માનન્દસ્તોત્રમ્” સમ્પૂર્ણમ્ ।

પ્રણામમન્ત્રઃ-

રામકૃષ્ણસ્ત્વભૂત્ યેન પુત્રવાન્ ભૌમમણ્ડલે ।
બ્રહ્માનન્દં નમામિ ત્વાં રાખાલદલનાયકમ્ ॥

Proofread by Aruna Narayanan

*Shri Brahmananda Stotram*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*